শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীগুরুৱাযুপুরেশ্ৱর অষ্টোত্তরশতনামস্তোত্ররত্নম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীগুরুৱাযুপুরেশ্ৱর অষ্টোত্তরশতনামস্তোত্ররত্নম্ ॥

পার্ৱত্যুৱাচ
দেৱদেৱ মহাদেৱ মহাৱৈষ্ণৱতল্লজ।
জীৱৱাতপুরেশস্য মাহাত্ম্যমখিলং ৎৱযা॥ **1**॥

মন্ত্রতন্ত্ররহস্যাদ্যৈঃ সহস্রাধিকনামভিঃ।
অদ্য মে প্রেমভারেণোপন্যস্তমিদমদ্ভুতম্॥ **2**॥

মহাৱৈকুণ্ঠনাথস্য প্রভাৱমখিলং প্রভো।
সঙ্গ্রহেণ শ্রোতুমদ্য ৎৱরাযুক্তাস্ম্যহং প্রভো॥ **3**॥

যস্য শ্রৱণমাত্রেণ জীৱবৃন্দেষু সর্ৱতঃ।
নাতিকৃচ্ছ্রেণ যত্নেন লসেযুঃ সর্ৱসিদ্ধযঃ॥ **4**॥

তাদৃশং সুলভং স্তোত্রং শ্রোতুমিচ্ছামি ৎৱন্মুখাৎ।

ঈশ্ৱর উৱাচ
মহাদেৱি শিৱে ভদ্রে জীৱৱাতপুরেশিতুঃ॥ **5**॥

মাহাত্ম্যৱারিধৌ মগ্নঃ পূরযামি ৎৱদীপ্সিতম্।
পূর্ৱং যন্নামসাহস্রং তস্য দেৱস্য ভাষিতম্॥ **6**॥

তস্যাদৌ ৱিজৃম্ভমাণৈরষ্টাধিকশতেন তু।
নামভির্নির্মিতং স্তোত্রং সর্ৱসিদ্ধিৱিধাযকম্॥ **7**॥

পঠিতুং নামসাহস্রং অশক্তাঃ সন্তি যে শিৱে।
তেষামর্থে স্তোত্রমেতৎ সঙ্গৃহীতং ফলপ্রদম্॥ **8** ॥

অনুকূলৌ দেশকালৌ যস্য স্তো জগতীহ তু।
পঠিতৱ্যং তেন নামসাহস্রং যত্নতঃ শিৱে॥ **9** ॥

আলস্যদূষিতে চিত্তে ৱিশ্ৱাসরহিতে তথা।
গুরুৱাতপুরেশস্য ন হি মূর্তিঃ প্রসীদতি॥ **10** ॥

গুরোরন্যত্র ৱিশ্ৱাসী তথা ৱাতপুরেশিতুঃ।
কথমেতৎফলং প্রোক্তং যথাৱদধিগচ্ছতি॥ **11** ॥

এৱ এৱ গুরুর্যস্য ৱৈকুণ্ঠো যস্য দৈৱতম্।
তস্য ভক্তস্য নূনং হি স্তোত্রমেতৎফলিষ্যতি॥ **12** ॥

অদ্য তে দেৱি ৱক্ষ্যামি নাম্নামষ্টোত্তরং শতম্।
স্তোত্ররাজমিমং পুণ্যং সাৱধানমনাঃ শৃণু॥ **13** ॥

স্তোত্রস্যাস্য ঋষিঃ প্রোক্তো দক্ষিণামূর্তিরীশ্ৱরঃ।
ছন্দোঽনুষ্টুপ্ তথা দেৱো গুরুৱাযুপুরেশ্ৱরঃ॥ **14** ॥

রমাশক্তিস্মরৈর্বীজৈঃ বীজশক্তী চ কীলকম্।
ধর্মার্থকামমোক্ষেষু ৱিনিযোগঃ প্রকীর্তিতঃ॥ **15** ॥

মূলমন্ত্রস্য ষড্ভাগৈঃ করাঙ্গন্যাসমাচরেৎ।
মহাৱৈকুণ্ঠরূপেণ ধ্যাতৱ্যাত্র হি দেৱতা॥ **16** ॥

ইন্দ্রনীলসমচ্ছাযং পীতাম্বরধরং হরিম্।
শঙ্খচক্রগদাপদ্মৈর্লসদ্বাহুং ৱিচিন্তযেৎ॥ **17** ॥

ক্ষীরাম্ভোধিস্থকল্পদ্রুমৱনৱিলসদ্রত্নযুঙ্মণ্টপান্তঃ
শঙ্খং চক্রং প্রসূনং কুসুমশরচযং চেক্ষুকোদণ্ডপাশৌ।
হস্তাগ্রৈর্ধারযন্তং সৃণিমপি চ গদাং ভূরমালিঙ্গিতং তং
ধ্যাযেৎসিন্দূরকান্তিং ৱিধিমুখৱিবুধৈরীড্যমানং মুকুন্দম্॥ **18**॥

## অথ অষ্টোত্তরশতনামস্তোত্রম্

মহাৱৈকুণ্ঠনাথাখ্যো মহানারাযণাভিধঃ।
তারশ্রীশক্তিকন্দর্পচতুর্বীজকশোভিতঃ॥ **19**॥

গোপালসুন্দরীরূপঃ শ্রীৱিদ্যামন্ত্রৱিগ্রহঃ।
রমাবীজসমারম্ভো হৃল্লেখাসমলঙ্কৃতঃ॥ **20**॥

মারবীজসমাযুক্তো ৱাণীবীজসমন্ৱিতঃ।
পরাবীজসমারাধ্যো মীনকেতনবীজকঃ॥ **21**॥

তারশক্তিরমাযুক্তঃ কৃষ্ণাযপদপূজিতঃ।
কাদিৱিদ্যাদ্যকূটাঢ্যো গোৱিন্দাযপদপ্রিযঃ॥ **22**॥

কামরাজাখ্যকূটেশো গোপীজনসুভাষিতঃ।
ৱল্লভাযপদপ্রীতঃ শক্তিকূটৱিজৃম্ভিতঃ॥ **23**॥

ৱহ্নিজাযাসমাযুক্তঃ পরাৱাঙ্মদনপ্রিযঃ।
মাযারমাসুসম্পূর্ণো মন্ত্ররাজকলেবরঃ॥ **24**॥

দ্বাদশাৱৃতিচক্রেশো যন্ত্ররাজশরীরকঃ।
পিণ্ডগোপালবীজাঢ্যঃ সর্ৱমোহনচক্রগঃ॥ **25**॥

ষডক্ষরীমন্ত্ররূপো মন্ত্রাত্মরসকোণগঃ।
পঞ্চাঙ্গকমনুপ্রীতঃ সন্ধিচক্রসমর্চিতঃ॥ **26**॥

অষ্টাক্ষরীমন্ত্ররূপো মহিষ্যষ্টকসেৱিতঃ।
ষোডশাক্ষরমন্ত্রাত্মা কলানিধিকলার্চিতঃ॥ **27**॥

অষ্টাদশাক্ষরীরূপোঽষ্টাদশদলপূজিতঃ।
চতুর্ৱিংশতিৱর্ণাত্মগাযত্রীমনুসেৱিতঃ॥ **28**॥

চতুর্ৱিংশতিনামাত্মশক্তিবৃন্দনিষেৱিতঃ।
ক্লীঙ্কারবীজমধ্যস্থঃ কামৱীথীপ্রপূজিতঃ॥ **29**॥

দ্বাত্রিংশদক্ষরারূঢো দ্বাত্রিংশদ্ভক্তসেৱিতঃ।
পিণ্ডগোপালমধ্যস্থঃ পিণ্ডগোপালৱীথিগঃ॥ **30**॥

ৱর্ণমালাস্বরূপাঢ্যো মাতৃকাৱীথিমধ্যগঃ।
পাশাঙ্কুশদ্বিবীজস্থঃ শক্তিপাশস্বরূপকঃ॥ **31**॥

পাশাঙ্কুশীযচক্রেশো দেৱেন্দ্রাদিপ্রপূজিতঃ।
লিখিতো ভূর্জপত্রাদৌ ক্রমারাধিতৱৈভৱঃ॥ **32**॥

ঊর্ধ্ৱরেখাসমাযুক্তো নিম্নরেখাপ্রতিষ্ঠিতঃ।
সম্পূর্ণমেরুরূপেণ সম্পূজিতোঽখিলপ্রদঃ॥ **33**॥

মন্ত্রাত্মৱর্ণমালাভিঃ সম্যকেশাভিতচক্ররাট্।
শ্রীচক্রবিন্দুমধ্যস্থযন্ত্রসংরাটস্বরূপকঃ॥ **34**॥

কামধর্মার্থফলদঃ শক্রুদস্যুনিৱারকঃ।
কীর্তিকান্তিধনারোগ্যরক্ষাশ্রীৱিজযপ্রদঃ॥ **35**॥

পুত্রপৌত্রপ্রদঃ সর্ৱভূতৱেতালনাশনঃ।
কাসাপস্মারকুষ্ঠাদিসর্ৱরোগৱিনাশকঃ॥ **36**॥

ৎৱগাদিধাতুসম্বদ্ধসর্ৱামযচিকিৎসকঃ।
ডাকিন্যাদিস্বরূপেণ সপ্তধাতুষু নিষ্ঠিতঃ॥ **37**॥

স্মৃতিমাত্রেণাষ্টলক্ষ্মীৱিশ্রাণনৱিশারদঃ।
শ্রুতিমৌলিসমারাধ্যমহাপাদুকলেবরঃ ॥ **38** ॥

মহাপদাৱনীমধ্যরমাদিষোডশীদ্বিকঃ।
রমাদিষোডশীযুক্তরাজগোপদ্বযান্বিতঃ ॥ **39** ॥

শ্রীরাজগোপমধ্যস্থমহানারাযণদ্বিকঃ।
নারাযণদ্বযালীঢমহানৃসিংহরূপকঃ ॥ **40** ॥

লঘুরূপমহাপাদুঃ মহামহাসুপাদুকঃ।
মহাপদাৱনীধ্যানসর্ৱসিদ্ধিৱিলাসকঃ ॥ **41** ॥

মহাপদাৱনীন্যাসশতাধিককলাষ্টকঃ।
পরমানন্দলহরীসমারব্ধকলান্বিতঃ ॥ **42** ॥

শতাধিককলান্তোদ্যচ্ছ্রীমচ্চরণৱৈভৱঃ।
শির আদিব্রহ্মরন্ধ্রস্থানন্যস্তকলাৱলিঃ ॥ **43** ॥

ইন্দ্রনীলসমচ্ছাযঃ সূর্যস্পর্ধিকিরীটকঃ।
অষ্টমীচন্দ্রবিভ্রাজদলিকস্থলশোভিতঃ ॥ **44** ॥

কস্তূরীতিলকোদ্ভাসী কারুণ্যাকুলনেত্রকঃ।
মন্দহাসমনোহারী নৱচম্পকনাসিকঃ ॥ **45** ॥

মকরকুণ্ডলদ্বন্দ্বসংশোভিতকপোলকঃ।
শ্রীৱৎসাঙ্কিতৱক্ষঃশ্রীঃ ৱনমালাৱিরাজিতঃ ॥ **46** ॥

দক্ষিণোরঃপ্রদেশস্থপরাহঙ্কৃতিরাজিতঃ।
আকাশৱৎক্রশিষ্ঠশ্রীমধ্যৱল্লীৱিরাজিতঃ ॥ **47** ॥

শঙ্খচক্রগদাপদ্মসংরাজিতচতুর্ভুজঃ।
কেযূরাঙ্গদভূষাঢ্যঃ কঙ্কণালিমনোহরঃ ॥ **48** ॥

নৱরত্নপ্রভাপুঞ্জচ্ছুরিতাঙ্গুলিভূষণঃ।
গুল্ফাৱধিকসংশোভিপীতচেলপ্রভান্ৱিতঃ ॥ **49** ॥

কিঙ্কিণীনাদসংরাজৎকাঞ্চীভূষণশোভিতঃ।
ৱিশ্ৱক্ষোভকরশ্রীকমসৃণোরুদ্ৱযান্ৱিতঃ ॥ **50** ॥

ইন্দ্রনীলাশ্মনিষ্পন্নসম্পুটাকৃতিজানুকঃ।
স্মরতূণাভলক্ষ্মীকজঙ্ঘাদ্ৱযৱিরাজিতঃ ॥ **51** ॥

মাংসলগুল্ফলক্ষ্মীকো মহাসৌভাগ্যসংযুতঃ।
হ্রীঙ্কারতত্ত্ৱসম্বোধিনূপুরদ্ৱযরাজিতঃ ॥ **52** ॥

আদিকূর্মাৱতারশ্রীজযিষ্ণুপ্রপদান্ৱিতঃ।
নমজ্জনতমোবৃন্দৱিধ্ৱংসকপদদ্ৱযঃ ॥ **53** ॥

নখজ্যোৎস্নালিশৈশির্যপরৱিদ্যাপ্রকাশকঃ।
রক্তশুক্লপ্রভামিশ্রপাদুকাদ্ৱযৱৈভৱঃ ॥ **54** ॥

দযাগুণমহাৱার্ধির্গুরুৱাযুপুরেশ্ৱরঃ।

**ফলশ্রুতিঃ**

ইত্যেৱং কথিতং দেৱি নাম্নামষ্টোত্তরং শতম্॥ **55** ॥

গুরুৱাযুপুরেশস্য সর্ৱসিদ্ধিৱিধাযকম্।
কৃষ্ণাষ্টমীসমারব্ধমাসেনৈকেন সিদ্ধিদম্॥ **56** ॥

কৃষ্ণাষ্টমীং সমারভ্য যাৱদন্যাঽসিতাঽষ্টমী।
তাৱৎকালং স্তোত্রমেতৎ প্রত্যহং শতশঃ পঠেৎ॥ **57** ॥

মাতৃকাপুটিতং কৃৎৱা হিৎৱাঽঽলস্যং সুমঙ্গলে।
একান্তভক্তিযুক্তো হি গুরুৱাযুপুরেশ্ৱরে॥ **58** ॥

জীৱন্নেৱ স ভক্তাগ্র্যো মাধৱাধিষ্ঠিতো ভৱেৎ।
তপ্তকাঞ্চনগৌরে হি তচ্ছরীরে সদা লসন্॥ **59**॥

গুরুৱাযুপুরাধীশোঽদ্ভুতানি হি করিষ্যতি।
অত আৱাং মহেশানি গচ্ছাৱঃ শরণং হি তম্॥ **60**॥

কারুণ্যমূর্তিমীশানং গুরুৱাযুপুরেশ্ৱরম্।
উড্ডামরেশতন্ত্রেঽস্মিন্ পটলে ক্ষিপ্রসাধনে॥ **61**॥

মহাৱৈকুণ্ঠনাথস্য গুরুৱাযুপুরেশিতুঃ।
অষ্টোত্তরশতং নাম্নাং সর্ৱসিদ্ধিৱিলাসকম্।
অধ্যাযং সপ্তমং পূর্ণমৱদাতং করোত্ব্যমে॥ **62**॥

॥ ইতি শ্রীগুরুৱাযুপুরেশ্ৱর অষ্টোত্তরশতনামস্তোত্ররত্নম্ সমাপ্তম্॥